This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१८२

॥श्रीगणेशायनमः॥ वृत्तद्युमणिस्थःकिंचिल्लेशः लिख्यते॥ अच्छंदःसच्छंदोवाङ्मयमखिलंद्विधावधातव्यं॥ गद्यादिकमच्छंदःसच्छं
दःस्पष्टमीयतिमत्रेषया॥१॥ छंदोभ्रष्टं काव्यं पठतामुपहासकारकंभवति॥ सुमतिभिरभ्यसनीयंछंदोऽतःसर्वकाव्यपूर्वांगं॥ पिंगलनागप्रमुखै
राचार्यैर्लौकिकंत्रिधाकथितं॥ गणमात्राक्षरभेदाच्छंदःस्तदिहस्फुटंपुरःकथये॥२॥ आर्यादिगणच्छंदोवैतालीयादिकंकलाच्छंदः॥ आद्यक्षरात्मक
स्यादेवंत्रिविधंहिलौकिकंछंदः॥३॥ माद्यष्टगणैःसगलैर्वाङ्मयमखिलंक्रमवंपरिव्याप्तं॥ तद्विज्ञानायातःसंतःसततंनिरालसाःसंतु॥४॥
सर्वगुरुनंतरंतगुरुलौ म्नोभ्यौ ज्रौस्तौत्रिकाणिवृत्ते॥ इलवर्णगणाःश्रीमन्नागाधिपपिंगलेननिर्दिष्टाः॥५॥ क्षितिरंबुचंद्रजलाकेजंज्वलन
मरुद्व्योमेदेवताकाः स्युः॥ श्रीसौख्यकीर्तिमतिरुज्मतिदेशानिवासनार्थनाशकराः॥६॥ मित्रत्वंमनयोरिहभययोर्भृत्यत्वमाह
नागेंद्रः॥ जतयोरौदासीन्यं सरयोर्गणयोररित्वमन्योग्यं॥७॥ मित्रगणान्मित्रगणोयदिचेद्वृद्धिंचमंगलंदिशति॥ भृत्यौविज
यमुदास्तःकार्यविनाशंरिपुःस्वजनपीडां॥८॥ भृत्यान्मित्रगणेसतिसिध्यतिकार्यसमस्तमथभये॥ अज्ञावत्वमुदास्तेधन
हानिःस्याद्रिपोस्वपतिनाशः॥१०॥ कार्याभावमुदास्तान्मित्रगणश्चेत्करोत्यथोभृत्यः॥ सर्वत्रात्वमुदास्तःफलाभावंरिपुरिपू

Acc. No. ~~1331~~ M-1537
Title - वृत्तद्युमणि.
Author - नरेन्द्र.
Date - ?
Subject - वृत्त.
folio - 4
Xerox - 7

Checked 2012

KKSU LIBRARY RAMTEK 441 106 M-1537 Dist. Nagpur

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नरविल्हान्॥११॥शत्रो मित्रगणश्चैवश्चून्य फलं वै करोसथो सथोभ्दयः॥ गृहिणीनाशमुदास्तो धननाशमरिःस्वनायकविनाशं॥१२॥
मित्रामित्रविचारोऽखिलकाव्ये दोषधिया कविभिः॥ नियतं कार्यो नायं नियमः स्याद्देवतागुरुस्तवने॥१३॥ हजयनधरषभ
वर्णानादौ हित्वा विधेयमथ काव्यं॥ हानिप्रदो हकारो जनकविनाशो जकारतो भवति॥१४॥ घातकरस्तु थकारो निरिव
लविनाशोगनकारतो ज्ञेयः॥ धनधान्यक्षयकर्त्ता रकारइह रोरुजां तनिं तनुते॥१५॥ तनुसंक्षयं षकारः कुरुते भोरा
जतो महाभीतिं॥ तस्मादनिष्फलदानष्टो वर्णान्सजेद्धकारादीन्॥१६॥ अथमात्रागणाः॥ टतचपषाः पंचगणा द्वित्रिच
तुःपंच षट्कलाबयवाः॥ टठडढणा अप्येते षट्पंचचतुस्त्रियुग्ममात्राःस्युः॥१७॥ टगणो द्विभेदयुक्तः तगण स्त्रिविधो
ऽथांश्चतुर्धा च गणाः॥ पगणो षधऽष्ट षगणो व्याख्येयः सूरिभिः स्त्रयोदशधा॥१८॥ दीर्घः संयुक्ताद्यः सानुस्वारो प्लुतो विस
र्गातः॥ पादांतगो द्विमात्रो ग्वक्रो सौ मात्रिको थलः सरलः॥१९॥ क्रमसंज्ञः पादादौ यो वर्णः स्याद्भवति संयोगः॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तस्मिन्युरस्थिते भाग्गुरुरपि लघुतां कश्चित्क्वचिद्याति ॥२०॥ यथा॥ दृढतरवैराग्यवतां निरतिशयानंदमग्नचित्तानां॥ पुंसांसु
रवायनभवति द्रमस्त्री पुत्रमित्रगेहादि॥ २१॥ सयंजनरहपूर्वो वर्णो लघुतां प्रयाति संस्कृतके॥ इहिकारो बिंदुयुतो प्राकृ
ते के कुत्रचिल्लघू भवतः॥२२॥ एकारौकारावशुद्धावपि वर्णमिश्रिनावपि च॥ सविभाषं ह्रस्वौ स्तः प्राकृत एवांऽध्रिनिधन
संस्थौ तौ॥२३॥ यदि दीर्घमपि च वर्णं लघुजिह्वापठति चेत्स चापि लघुः॥ सत्वरपठितौ द्वौ वा त्रीन् वर्णान् कमेवजानीयात्॥२४॥
ग्लो द्वादश श्रुमाद्या अपि च समानेन लक्षिताः सकलाः॥ अत्र भवयुर्नूनं क्रमशस्त्वकादिसंख्यया सहिताः॥२५॥ अथ गणसंज्ञा॥
हरशशिनाविथ सूर्यः शक्रः शेषः स्त्वहिः स्तथा कमलं॥ ब्रह्मा कलिश्चंद्रध्रुवधर्मश्विरमस्तु शालिकरनामा॥२६॥ संज्ञा
स्त्रयोदश स्युः क्रमशः षगणस्य निखिलभेदानां॥ [illegible] ॥ हरशशिसूर्यादीनां पर्यायैरप्यसौ स्फुटीभूयात्॥२७॥ इंद्रा
सनं हि सूरश्चापा हीराऽध्वरो रवरः कुसुमं॥ अहिगणपापगणाविति पगणस्याष्टप्रभेदनामानि॥२८॥ अहितैरावत

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कुंजर तारापतिमघदंलिगजदंताः॥ सुनेरं द्रो गगनमिति स्युः संज्ञाः पंच मात्रिकादि लघोः॥२९॥ अयमेवं गणो विह्लै विझे योदं तमेघप
यथि॥ पंचकलारिवलल घुरिह निर्दिष्टोजातिरो पै रवरः फणिना॥३०॥ जो हलबिडाल पक्ष्यहि यक्षामृतपन्नगारानसमीराः॥
वीणामृगेंद्रगरुडाः पंचकलांतलघोः स्मृताः संज्ञाः॥३१॥ अत्रविशेषोनुक्तः पंचकलेनेकरास्यनामास्यात्॥ अहितैरावतजोह
लमुरयसंज्ञाभिर्यरावपि ज्ञेयो॥३२॥ कर्णकर तलपयोधर बसुचरणाख्यानि सद्विज वराणि॥ सर्वांत मुध्यमुखगाऽखिल
लघु चगणस्य पंचनामानि॥३३॥ लंबितस्कमति मनोहर रसिकल हलहित कर्णरसलग्नाः॥ सुरलतासुरतालयमिति
संज्ञाः सर्वगस्यचः कथिताः॥३४॥ करपाणिहस्त बाहु प्रहरणभुजदंडरत्नकुंभलास्यः॥ वज्रगजाभरणाऽशनि नाग्नाभुज
भूषणैर्निधनगुरुचः॥३५॥ भूहयनरगजपतयो वसुधाधिपरज्जु चक्रगोपालाः॥ पवन पयोधरनायकनरेंद्र संज्ञा
गमध्यचगणस्य॥३६॥ चरणयुगुलपदपादा दहनस्तातः पितामहास्त्रोपि॥ बलभद्रगंडकाहुः प्रभवंतिचतु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ष्कास्य गुरुसंज्ञाः ॥३७॥ अंतान्तर्मुखगानां च तुष्कलानां करादिसंज्ञाभिः ॥ सज्जभावर्णगणा अपि विज्ञेयाः सर्ववृत्तसारज्ञैः ॥३८॥
द्विजवरपरमो पायो परमउपायस्तथा परमपादः ॥ इति संज्ञाः सर्वलये भगणस्योक्ताः फणीश्वरेणात्र ॥३९॥ ध्वजचिह्नचू
तमाला तुंबुरुरसवास वलयचिरपवनाः ॥ तोमरपत्रचिरालय संज्ञा ॥ स्युर्लीननस्य तगणस्य ॥४०॥ करताल तालप
टहानंदः छंदः समुद्रनिर्वाणाः ॥ तूर्यस्तत्पर्यायाः स्मरपतिगिरिसादिगात्रिकल संज्ञाः ॥४१॥ भावकस्तस्यपर्यायः सात्त्विकर
सताण्डवाभिधानानि ॥ नारीकुलभाविन्याविस्यष्पास्तेतिलस्य तगणस्य ॥४२॥ नूपुरचामर मानस फणिमुग्धा
भरणचक्रवलयाख्याः ॥ कुंडलरत्नानेहारावलिरिति संज्ञा गरूपदस्यस्युः ॥४३॥ केयूरहारकंकणताटंका अपि
गुरोर्मताः संज्ञाः ॥ नूपुरमुख पर्यायैर्ज्ञेयो दोसौ बुधैर्विनाचक्रं ॥४४॥ निजपरमस्वरूपपदयुग्मिश्रय संज्ञासंज्ञित
स्त्रिविधनामा ॥ द्विलघुर्दगणः कथितः पूर्वाचार्यैरहीश्वरप्रमुखैः ॥४५॥ काहलकरतलशरार रवरसरूप स्पर्श
गन्ध कृतकरणिः ॥

शंखोमकर्दंडो नानाकुस्कुमा निचेतिलघुसंज्ञा॥ यगणादि लांतसंज्ञा गणवर्णप्रभृति वृत्तनिकुरंबे॥ द्विःपठिता
अपिकश्चित्तन्नलक्ष्यानुसारतोज्ञेयाः॥ यद्यप्येताःसंज्ञामादीनां कंदतोत्रनप्रोक्ताः॥ पर्यनसितिरेतासां तथा
पितन्निनिवदामि ताःप्रायः॥ द्रोद्येमौ धैस्तेषां पर्यायैरीतितैर्यथायोग्यं॥ लाघवमनतिक्रम्य छंदःप्रकरः
प्रकाशयेत निखिलः॥ रामांभोनिधिसायकरसमुनिवस्करं ध्रदिग्विरावार्कमुखाः॥ संज्ञास्तथैयगाद्यास्त्र्यादीनां लो
कतोनुसंधेयाः॥ श्रमविरामो यतिरिति तुर्यांशपादमाहु रविशेषे॥ अयुगसमं युक्चसमं स्थानंनूनं प्रचक्षते
विबुधाः॥ विषममथार्द्ध समसमाभिति विज्ञेयं बुधैः क्रमाद्वृत्तं॥ यस्य तुभिन्नं चिह्नं पादेषुच तुर्षु तन्मतं विषमं॥
पूर्वांघ्रिवत्तृतीयो द्वितीयवच्चेच्चतुर्थकोर्द्ध समं॥ अंघ्रिषुच तुर्षु तुल्यं लक्ष्मभवद्यस्य तत्समं वृत्तं॥ श्री॥ कृ-च ५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पृ० ८१

रतधुमणि १ ४

स्पश्लोक

KKSU LIBRARY
RAMTEK
441 106
M-1537
Dist. Nagpur

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=05.10.20 17:19
,TRANSFERRED=2020/10/05 at 17:21:42
,PAGES=7
,TYPE=STD
,NAME=S0003888
,Book Name=M-1537-VRITDHUMANI
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection